ARYAVART SHODH VIKAS PATRIKA
RNI TITLED NO. UPBIL04292RNI
REG. NO. UPBIL/2014/66218 PP. No.- 278-282
ISSN NO.- 2347 – 2944 (Print)
e-ISSN NO.- 2582 – 2454 (Online)
Vol.-18, No.-IV, Issues-34, YEAR-Oct-Dec. 2024

# संस्कृतसाहित्यस्य प्रवृत्तयः

डॉ० महेश कुमार द्विवेदी
सहाचार्यः, श्रीएकरसानन्द– आदर्शसंस्कृतमहाविद्यालयः मैनपुरी (उ०प्र०), भारत

Received-17.12.2024, Revised-23.12.2024, Accepted-27.12.2024
E-mail : maheshd942@gmail.com

***सारांशः विश्वे सर्वविधभाषागतसाहित्ये संस्कृतसाहित्यस्य समृद्धतमं स्वरूपं समुपलभ्यते। संसारस्य प्राचीनतमो ग्रन्थः ऋग्वेद एवेति विपश्चिद्भिः प्रमाणितम्। विश्वबोधप्रसङ्गे सृष्टिविषयकाः सर्वथा नवीनाः समुपायाः भारतीयैः ऋषिभिः समुद्घाटिताः।***

***'आनीदवातं स्वधया तदेकं तस्माद्धान्यत्रा परः किं च नास' (नासदी.2)***

***ततः परं साम्प्रतं यावत् यथाकालं संवर्धयदेतत्साहित्यं सुधीभिः रसान्वितं कुर्वद्भिः नितरां संसेव्यते। भाषाविस्तारदर्शने आधुनिकं यावत् प्रस्थानवैभिन्यं विभाति। परिनिष्ठितसुसमृद्धतमेनैतत्साहित्येन न केवलं रसचर्वणा न वा सौन्दर्यबोधोऽपितु संस्कृते सर्वा अपि प्रवृत्तयः साहित्ये अवलोकयितुं शक्याः। वेदवेदाङ्गपुराणन्यायमीमांसाधर्मशास्त्राणां लेखनप्रवृत्तिरिममेव सूचयति यत् तदानीमस्यां भाषायामेव लोकव्यवहारः सुसञ्चालितः आसीत् – "संस्कृतं नाम दैवीवागन्वख्याता महर्षिभिः"***

***कुंजीभूत शब्द– ऋग्वेद, रसचर्वणा वेदवेदाङ्गपुराणन्यायमीमांसाधर्मशास्त्राणां, लोकव्यवहारः, सौन्दर्यबोधो, समुद्घाटिताः, नवीनाः।***

**वेदकालादारभ्य भाषिकीसाहित्यव्यवस्थापनाय तात्त्विकचिन्तन–** प्रवृत्यनन्तरं काव्य–कोश–नाट्य–कला–विज्ञानादिविषयाः प्रवर्तिताः। एतत्प्रवर्तनायां मौलिकाः ग्रन्था वेदा एवेत्यत्रा न कश्चन विसंवादः। संस्कृतसाहित्यस्य प्रवृत्तिसन्दर्भे अङ्कुरण– पल्लवन– पुष्पाद्यमरूपणीभिः प्रक्रियाभिः प्रवृत्तिद्वयी उपस्थाप्यते सांस्कृतिकी विधागता च। प्रथमायां प्रवृत्तौ विश्वबन्धुत्वभावः, कर्मसिद्धान्तः, पारिवारिकसौहार्दम्। विधागतप्रवृत्यां वैदिकसाहित्यप्रवृत्तिः, पौराणिकसाहित्यप्रवृत्तिः, लौकिकसाहित्यप्रवृत्तिः आधुनिकसंस्कृतसाहित्यप्रवृत्तिश्च प्रतिपाद्यन्ते। प्रवृत्तिपदेनात्रा व्युत्पत्तित्रायमादाय प्रवृत्तयः प्रस्तूयन्ते प्रवर्तयतिः नियोजयति याऽसौ प्रवृत्तिः, नियोजनेन स्वीकरणीयाः भावा विवक्षिताः। प्रवर्त्तनं प्रवृत्तिरितिपक्षे साहित्यप्रवर्तनारूपोऽर्थः अभीष्टः अत्र प्रस्तोतव्याः खलु साहित्य–प्रवर्तनामूलकाः ग्रन्थाः। तृतीये व्याख्याने प्रवर्त्तते इति प्रवृत्तिरित्यस्मिन् विषये खलु साहित्यिकी स्थितिः प्रस्तुता सेत्स्यते।

**सांस्कृतिकप्रवृत्तयः –**

1. **विश्वबन्धुत्वभावाः** – विश्वबन्धुत्वमूलास्मदीया संस्कृतिः न केवलमस्माभिरपितु सर्वैः विश्वजनैः स्वीक्रियते अवधार्यते च। शान्तिसौख्य– सौख्याक्यादिभावा अस्मद्देशेभ्य एव अपेक्ष्यन्ते राष्ट्रान्तरैः। विश्वगुरुत्वपदवी– समलङ्कृतस्यास्यावधारणा वेदेषु पुराणेषु काव्येषु च सर्वत्रा दरीदृश्यते। सर्वधर्मसद्भावप्रधानेयं विद्या चिन्तञ्नं सार्वभौमिकं सर्वधर्मपुरुषार्थप्रदायकं संसारतरणितात्वं निष्पादयति। पृथ्वीसूक्ते प्रथमं समेषामाधारत्वेन स्थावरजङ्गमसर्वविधप्राणिनामाश्रयत्वेन, पोषकत्वेन विश्वम्भरारूपेण प्रतिष्ठाप्यते– "माता भूमिः पुत्रोऽहं पृथिव्याः"– (पृथ्वी सूक्त 12) पृथ्वीं मातृरूपां मन्यतामिति सन्देशो वेदादेव प्राप्यते।

भूमे मातर्निधेहि मा भद्रया सुप्रतिष्ठितम्।
संविदाना दिवा कवे श्रियां मा धेहि भूत्याम्।। (पृथ्वी. 25)

इयमस्ति प्रार्थनास्माकं विश्वमूलां दृष्टिं व्यनक्ति। आकाशवारिवह्नि– क्षित्यादिभिः सह संकल्पिता भावाः विश्वाभ्युदयाय एव। अध्यात्म– दर्शन– साहित्यैः सर्वथापि कुटुम्बभावोऽस्माभिरवलोक्यते।

अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्।। (हितो. 1–69)

इत्येतदौदार्यं विश्वबन्धुत्वमेव बोधयति। मानवीयस्य समुन्नतिभूतं रहस्यं ब्रुवता सुप्रसिद्धदार्शनिकेन भर्तृहरिणा निगद्यते यत्– वंशसमुन्नतिः अर्थात् सम्यक् नयति सर्वोच्चविचारादर्शान् प्रति या सैव सार्थकता–

परिवर्तिनि संसारे मृतः को वा न जायते।
स जातो येन जातेन याति वंशः समुन्नतिम्।। (नीतिशतक 32)

नीति– अध्यात्म– भक्ति– त्याग– योगादिभावान् संयोज्य प्रवृत्तिनिवृत्ति– प्राधान्येन विश्वबन्धुत्वमेव विस्तारयति अस्मदीया संस्कृतिः। अत्र शङ्कराचार्य– कौटिल्य– चाणक्य– अरविन्द– विवेकानन्द– रवीन्द्रनाथ– महात्मागान्धिसदृशविभूतयः एवमेव प्रतिपादयन्ति यत् विश्वेऽहिंसा– स्वीकरणेनैव विश्वशान्तिः सम्भवति। विश्वधर्मभावना विश्वकल्याणायैव। समेषां धर्माणां सारतत्त्वस्वीकरणेनैव विश्वधर्मप्रतिष्ठा संभवति। महर्षिपतञ्जलिः योगशास्त्रो अहिंसा– सत्यास्तेय– यमादिमहत्वं वर्णयन् ब्रवीति यत् एते गुणाः सर्वधर्मावलम्बिभिः स्वीक्रियन्ते–

अहिंसा–सत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः।
जातिदेशकालसमयानवच्छिन्ना सार्वभौमा महाव्रतम्। (योग. 30–31)

योगस्येयं अवधारणा साम्प्रतमवधार्यते सर्वैः। सर्वेषु देशेषु योगस्य शिक्षा भूयसी प्रतिभाति। सर्वधर्मसामञ्जस्य मूला विद्या विश्वसार्वभौमत्वमेव बोधयति। विश्वधर्मप्रसङ्गे सर्वेषामभ्युदयो यथा स्यात्तदर्थं सर्वैः देशवासिभिः प्रतिदिनमेव मुक्तस्वरेणोच्यते यत्–

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्।।

2. **कर्मसिद्धान्तः** – "क्रियावानेष ब्रह्मविदां वरिष्ठ"– इत्यनेन श्रुतिवाक्येन क्रियते यत्तत्कर्म। किं क्रियते, कथं क्रियते? कुत्र कर्मण उपस्थापना इत्यादिबोधनेच्छा जागर्ति। अत्रा श्रुतिस्मृत्यनुकरणात् धर्माचरणेन स्वकर्तव्यनिर्वाह एव कर्म इति व्यपदिश्यते। नित्य–नैमित्तिक प्रायश्चितोपासनानुष्ठानमूलकानि बहूनि कर्माणि सन्ति। परन्तु स्मृतिसरणिरेवं बोधयति यत् वर्णाश्रमधर्मव्यवस्थानिहितानि कर्माण्येव कर्तव्यानि भवन्ति–

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।। (ईशावास्योपनिषद्)

इत्यत्रा कर्माणि कुर्वन्त एव लोके जीवनेच्छां साधयन्तु इत्येवोपदेशः। यस्तु क्रियावान् पुरुषः स विद्वान् इत्येवं वाक्यं अस्मान्नेवमेव बोधयति यत् जीवनस्य स्थितिः कर्मण्याधारिता। ऋषयः, कवयः, विद्वांसः, सर्वविधप्राणिनश्च कर्मद्वारैव साफल्यं समुपलभन्ते। आचार्यभर्तृहरिणा कर्ममहिमा अनुपमैः दृष्टान्तैः संसाधयता प्रोच्यते यत्– विश्वप्रवृत्तिः कर्माधीनैव, देवो ब्रह्म मनुष्यो वा स्यात् सर्वेऽपि कर्माधीना एव। अतएव कर्मभ्य एव नमः। तथा हि–

नमस्यामो देवान्नु हतविधेस्तेऽपि वशगाः,
विधिर्वन्द्यः सोऽपि प्रतिनियतकर्मैकफलदः।
फलं कर्मायत्तं किममरगणैः किञ्च विधिना,
नमस्तत्कर्मभ्यो विधिरपि न तेभ्यः प्रभवति।।5

भगवद्गीतायां दर्शनेषु च सर्वत्रा पुनर्जन्मवादः स्वीकृतः मानवीयजन्मावधारणा तस्य कर्मवशादेव सञ्चालिता भवति। पूर्व–पूर्वजन्मकृतकर्मभिरेव गृहीतजन्मकस्य जीवनमाश्रितं भवति–

"पूर्वजन्मकृतं कर्म तद्दैवमिति कथ्यते"

जीवो न पौनःपुन्येन जन्ममृत्युबन्धनात् मुच्यतेऽपितु ज्ञानेन आत्मसाक्षात्कारेणैव तस्य मुक्तिः सम्भाव्यते– ऋते ज्ञानान्नमुक्तिः

भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे।।

श्रीमद्भगवद्गीतायामपि अर्जुनमुद्बोधयता भगवता कृष्णेनोच्यते–

ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन (गीता 4.37)

परञ्चात्रा सकामनिष्कामप्रवृत्तिर्निवृत्तिर्वा कतमः पक्षः श्रेयस्करः अथवा ज्ञानसरण्या कीदृशं कर्म कर्तव्यमितिविषयकः कर्मसिद्धान्तः गीतायां साधूपात्तः निष्कामकर्मयोगः– एतेनैव संसारतरणिः सम्भाव्यते। पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनमित्यादिनिवृत्या जीवो ब्रह्मैक्यं साधयति। तथाविधं कर्म निष्कामयोग एव। सैव च सिद्धान्तपक्षः। आसक्तिराहित्यमेव तल्लोकपरलोकोभयं साधयति। तथा हि–

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यते महीम्।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः।। (गीता 2.37)

अनासक्तिरीत्यैव कर्मभाग् आत्यन्तिकदुःखनिवृत्तिं स्वीकरोति आसक्तिरीत्याकृतं कर्म केवलं दुःखाभावकरं न तु बन्धननिवृत्तिहेतुत्वमत आह भगवान् कृष्णः–

तस्मादसक्तः सततं कार्यं कर्म समाचर।
असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः।। (गीता 3.19)

भर्तृहरिरपि एतत्कथयति यत् ब्रह्माविष्णुरुद्रादिदेवता अपि कर्मद्वारैव विश्वस्य सृजनपालनसंहारादिकं कुर्वन्ति। सूर्योऽपि प्रतिदिनं भ्राम्यति गगने। कर्मण एव महिमा समेषां सर्वत्रा दृश्यते। अतः कर्मैव पूजा। दैवाधीनं जगत्सर्वं मंत्राधीनास्तु देवताः इत्येतत्कथनं सर्वेभ्यः इममेव शिक्षयति यत् स्वस्वकर्मानुसारं सर्वैः भाव्यम्।

3. **पारिवारिकसौहार्द्रम्** – देशवासिनां सभ्यता संस्कृतिश्च पारिवारिकवातावरणे एव वसति। राष्ट्रस्य परिकल्पना देशनगरग्रामकुटुम्बरूपेणैव संधारिता। पारिवारिकी अवधारणा पूर्ववर्तिनां जनानां पथानुसारिणी एव भवति। अतः कुटुम्बस्य स्थितिः सर्वथा सदाचारविचारविकासशीला स्यात् बन्धुबान्धवानां व्यवहारमूलाप्रवृत्तिः सविनया स्यात् तदर्थं वेदाः स्मृतयः काव्य–नीति–नाटकादिमाध्यमेन बहवो दृष्टान्ताः प्रवर्त्तते। समाजस्य सर्वविधसमुन्नत्यै सामञ्जस्याय च ब्रुवन्ति वेदाः–

समानी व आकूति समाना हृदयानि वः।
समानस्तु वो मनो यथा वः सुसहासति।। (ऋ. 10, 191–4)

कुटुम्बीया प्रवृत्ति समन्विता स्यात्। गृहस्थाः सदस्या सविनयाः स्युस्तदा सौहार्द्रं स्वत एव विकसति। कुटुम्बीयाभ्युदयाय सदस्यानामाचरणं एवं स्यात् तथा हि–

अनुव्रतः पितुः मात्रा भवतु संमनाः।
जाया पत्ये मधुमतीं वाचं वदतु शान्तिवाम्।। (अथर्व. 3-30-2)

पारस्परिकविचारव्यवहारप्रणाली आचारेणैव सौहार्द्रमावहति– दाम्पत्योः सौहार्द्रमुभयोः संतुष्टेनैव संभवति। योषायां प्रसन्नतायामेव कुलं संवर्द्धते। सैव कुलश्रीः गृहस्वामिनी पुत्रोऽपि आज्ञाकारी पतिरपि हितसंवर्द्धको यथा स्यात् तदैव पारिवारिकं सौहार्द्रं संभवति।

स्त्रियां तु रोचमानायां सर्वं तत् रोचते कुलम् (मनु. 3-62)
सन्तुष्टो भार्यया भर्ता भर्त्रा भार्या तथैव च।

यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम्।। (11–3–60)

पारिवारिकसौहार्द्रविकासाय विद्यापि सानन्दकरी सिध्यति। आयुर्विद्यायशोबलाद्यर्जनाय अभिवादनशीला प्रवृत्तिरपि पारिवारिकं सौहार्द्रं जनयति। मातृवत् रक्षा, पितृवत् हितसंवर्द्धनम्, कान्तावत् रम्यता, पुत्रावत् आज्ञाकारिता, एतत्सर्वस्वीकरणेनैव सामञ्जस्यं भवितुमर्हति परिवारे।

समेषां व्युत्पत्याशयानां समन्वयो विधास्यते सारांशे। इह तु केवलं प्रवृत्तीनां– उन्मीलनं स्पष्टीक्रियते।

न केवलं प्राच्यत्वेन न वा सर्वोत्कृष्टत्वेन अस्य साहित्यस्य अप्रतिमत्त्वमपितु विश्वस्तरीयसाहित्ये उद्‌भावानां चारुत्वं विचाराणां परिपूर्णत्वं साक्षाद्देवभाषात्वं, आद्यन्तरहितत्त्वं, विश्वबन्धुत्वादिभावाः समुन्मीलिताः सांस्कृतिकप्रवृत्तौ। इदानीं विधागतप्रवृत्तयः प्रस्तूयन्ते–

4. **वैदिकसाहित्यप्रवृत्तिः** – भारतीयज्ञानविज्ञानाश्रिता वेदाः ते यथा मंत्राद्रष्टृभिः ऋषिभिः प्रत्यक्षीकृतास्तथैवोत्तरकालिकाः शास्त्राप्रणेतारः वेदोक्तसूक्तेषु तत्साहित्यं समुन्मीलितवन्तः। अत्रा उषर– संवादादिसूक्तानि प्रमुखानि सन्ति। साहित्यमूलकानि सर्वविधतत्त्वानि अत्रान्वेषितानि साहित्यकारैः। वेदोक्तानि नैकविधमंत्राणि सन्ति यत्रा साहित्यमूलक अलङ्कारादिप्रवर्तना स्पष्टतया समुल्लेखिता वर्तते। तथा हि–

१. "उत त्वः पश्यन् न ददर्श वाचं उत त्वः शृण्वन् न शृणोत्येनाम्।
उतो त्वस्मै तन्वं विसस्रे जायेव पत्ये उशती सुवासाः।।
२. द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति।।

न केवलं वैदिकसंहितास्वपितु वेदाङ्गे व्याकरणनिरुक्तादिषु अपि यथा–
तेन तुल्यं क्रिया चेद्वतिः –
यद् अतत् तत्सदृशं तदासां कर्म इति गार्ग्यः

वेदस्य भाषा संस्कृतमेव अतस्तत्साहित्यस्य प्रवर्त्तनमत्रैव विस्तरेणाकल्पनीयम्। एतत्तु दिग्दर्शनमेव। रसालङ्कार–रीति–गुणादीनामपि प्रवृत्तिः वेदादेव सिध्यति। संस्कृतसाहित्ये इयं प्रवृत्तिः कारणतया ज्ञायते। अत इयं प्रवृत्तिः संस्कृते उद्‌भावनामूला प्रवृत्तिः कथयितुं शक्यते।

5. **पौराणिकसाहित्यप्रवृत्तिः** – वेदाख्यानोपनिबन्धनप्रायं पुराणमिति राजशेखरोक्तदिशा। तत्र भवः पौराणिकः। पौराणिकञ्च साहित्यं तस्य प्रवृत्तिरित्यत्रा काव्यविद्भिः वेदादानीय पुराणेषु च परिपोष्य साहित्ये सिद्धान्तरूपेण स्वीकृताः साहित्यसन्दर्भाः। कथोपकथननिबद्धानि अष्टादशपुराणानि संस्कृतसाहित्यस्य पुरुषार्थचतुष्टयं सुस्पष्टेन साधयन्ति। रामायणं महाभारतञ्च संस्कृतसाहित्यस्य उत्कृष्टे निदर्शने स्तः। अत्रात्यानां रसालङ्कार–गुणरीतिप्रवृत्यादीनां प्राञ्जलं स्वरूपं परिपुष्णाति।

"वाग्वैदग्धप्रधानेऽपि रस एवात्र जीवितम्"
"नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा।
कवित्वं दुर्लभं तत्र शक्तिस्तत्रा सुदुर्लभा।।"२

नात्रा केवलं काव्यस्वरूपमपितु संस्कृतसाहित्यस्य बृहत्त्रायीरूपेण ख्यातिगतानां काव्यानां शाकुन्तलविक्रमोर्वशीयस्वप्नवासवदत्तादिनाटकानां च प्रवर्तनं एतन्मूलकत्वमेव। संस्कृतसाहित्यप्रवृत्तिसन्दर्भे इयमपि प्रवृत्तिरुद्‌भावनामूलैव।

6. **लौकिकसाहित्यप्रवृत्तिः** – लौकिकसाहित्यप्रवृत्तिः वेदपुराणानुशीलनात् लोकानुगामिप्रवृत्तितया विदुषां अपरिमितव्युत्पत्तिप्रतिभया च गङ्गाप्रवाहवत् प्रवहमाणा निस्सरिता। असावेव प्रवृत्तिर्लौकिकानां ब्रह्मानन्दस्वाद– सहोदररसोद्रेकं चमत्कारजनकञ्चाशयं व्याप्नोति। अत्रा नाट्य– काव्य– महाकाव्य– ऐतिहासिककाव्य– चम्पूकाव्य– गीतिकाव्य– नाटकादीनि च प्रमुखानि निदर्शनानि यत्र लोकसाहित्यस्य साक्षादवच्छिन्ना प्रवाहिता धारा अवलोक्यते। साहित्यन्नाम लोकस्य पारस्परिकचेतनाऽचेतनप्राणिषु आशयात्मकभावप्रकटनाय मनोवैनोदिकाय प्रयुक्ता कापि रसादिसम्पृक्ता वाणी। इयं प्रवृत्तिः लोकजनाश्रिता मनोहारिणी– पुरुषार्थसाधिका च वर्तते। काव्यमयीयं प्रवृत्तिरलङ्कारादि–प्रवर्तनायै वेदाङ्गरूपं सप्तममङ्गमित्यपि केनचिदाचार्येण स्वीकृता। अस्यां प्रवृत्तौ लोकस्य मार्मिकं चित्राणं समुपस्थापितं वर्तते।

7. **आधुनिकसंस्कृतसाहित्यप्रवृत्तिः** – इतः पूर्वं प्राच्यप्रवृत्तीनां चर्चोपस्थापिता। इदानीं आधुनिकाः काश्चित् प्रवृत्तयः उपन्यस्यन्ते। आधुनिकपरिप्रेक्ष्ये संस्कृतसाहित्ये कतिपयाः नवीनाः विधाः प्रवर्त्तन्ते, येष्वपरि सहृदयरसिकाणां लेखनी साहित्यलेखने समारब्धा। संस्कृतसाहित्यस्य समुत्कृष्टं स्वरूपं परिशीलितं अस्माकं पूर्वकविभिः महाकविभिश्च नाट्यकाव्यादिप्रवृत्यादिभिः। परञ्चात्र पण्डितराजजगन्नाथोत्तरकाले काव्यनाट्यादिभिस्सह कतिपयनावीन्यं परिलक्ष्यते तत्साहित्ये अथवा वेदपुराण–काव्यात्मकप्रवृत्यनुसारेण प्रवृत्तीनां विस्तारः आधुनिकसाहित्ये एवं ज्ञातव्यः– (कालिदासोत्तरसाहित्ये) ३

१. पौराणिकीकथाप्रवृत्तिः, २. संक्षेपीकृतकथाप्रवृत्तिः, ३. संधानकाव्यप्रवृत्तिः, ४. ऐतिहासिककाव्यप्रवृत्तिः, ५. चरितप्रधानकाव्यात्मकप्रवृत्तिः, ६. उपदेशपरकमहाकाव्यात्मकप्रवृत्तिः।

वस्तुतः उपर्युक्ताः प्रवृत्तयः आधुनिकसंस्कृतसाहित्यप्रवृत्तिसन्दर्भे– ऽवान्तरत्वेनास्माभिः स्वीकृता न च मूलोद्‌भावनारूपेण। मूलोद्‌भावानां कविवर्याणां मौलिकीप्रवृत्तिविषये लौकिकसाहित्ये अस्माभिश्चर्चिताः प्रवृत्तयः। साम्प्रतं तदुत्तरीयाः प्रवृत्तयः प्रस्तूयन्ते। यद्यपि एतासां प्रवृत्तीनामुपन्यासस्तत्रापि प्राप्यते। तदपि आधुनिकपरिप्रेक्ष्ये एवास्माकं तात्पर्यमिति स्पष्टमत्रा, येन भ्रान्तिर्न जायताम्।

**१. पौराणिकीकथाप्रवृत्तिः** – पौराणिकीकथाप्रवृत्तिविषये कालिदास– अश्वघोषानन्तरं महाकाव्यानां विशिष्टप्रवृत्तिरलङ्कृताशैली एव मन्यते। कालिदासाश्वघोषसादृश्ये एतत्काव्यानां निम्नाङ्किताः विशेषताः स्वीकृताः– (1) सर्गसंख्याधिक्यं वर्णनविस्तारश्च, (2) एकाधिकसर्गेषु चित्राबन्धविस्तारः, (3) कथावस्तुनो न्यूवता, (4) भाषाचमत्कारः वक्रताऽऽग्रहः, (5) पाण्डित्यप्रदर्शनम्।

[१]भारवि–माघ–श्रीहर्षादीनां महाकाव्यानि एतच्छैल्याः उत्कृष्टनिदर्शनानि सन्ति। महाकविकालिदासस्य प्रसादगुणसम्पन्नवैदर्भीरीतित्यनुवर्त्तनपरा नैके कवयः, येषु पौराणिकीकथाश्रितशैल्याः पूर्ववर्तिकविप्रवृत्तिप्रभावोऽवलोक्यते। तथा हि– कुमारदासस्य जानकीहरणम्, उद्भटकवेः कुमारसम्भवम्, भर्तृमेण्ठकृतं हयग्रीववधमहाकाव्यं, कविराजकृतं पारिजातहरणमहाकाव्यं,जयद्रथकृतं हरचरितचिन्तामणिकाव्यादीनि प्रमुखानि उदाहरणानि सन्ति। ऊनविंशतिशताब्दौ उमाशंकरत्रिपाठिकृतं क्षत्रपतिचरितम्, रेवाप्रसादद्विवेदिकृतं सीताचरितं, राजेन्द्रमिश्रकृतं जानकीजीवनं, सत्यव्रतशास्त्रिकृता रामकीर्तिकौमुदी, एतानि महाकाव्यानि पौराणिककथा– प्रवृत्तिश्रितान्येव सन्ति। सर्वाण्यपि महाकाव्यानि देशस्य भूगोल– इतिहास– संस्कृति– चिन्तनपरम्पराणां ललितकाव्यात्मकाभिव्यक्तीः साधयन्ति। अत्र द्विसहस्रमिते भारते ज्ञान– विज्ञान, शिल्पकला– आचार– विचारादीनां सौन्दर्यपरिपूर्णो परिचयः प्राप्यते।

**२. संक्षेपीकृतकथाप्रवृत्तिः** – अस्यां प्रवृत्तावपि रामायणमहाभारतकथा– प्रवृत्तेः प्रसङ्गः परंचात्रा तत्कथा संक्षिप्तरूपेण प्रस्तुता वर्तते। अत्र कवयः मूलग्रन्थवैशिष्ट्यं रक्षन्तः काव्यवस्तु प्रस्तुतवन्तः। क्षेमेन्द्रकृता रामायणमञ्जरी, भारतमञ्जरी, बृहत्कथामञ्जरी, अमरचन्द्रकृतं बालभारतम्, सोमदेवकृतं कथासरित्सागर इत्यादिनि उत्कृष्टोदाहरणानि सन्ति। क्षेमेन्द्रस्य भारतमञ्जरी महाभारतस्य संक्षिप्तरूपान्तरणमस्ति। अस्मिन् काव्ये 10892 श्लोकाः 19 पर्वाणि च सन्ति। रामायणमञ्जर्यां रामायणस्य संक्षिप्तः सारः। अत्र 6400 पद्यानि सप्तकाण्डानि च विद्यन्ते। रामायणमञ्जर्याः सुन्दरकाण्डे–

सूर्यरत्नगृहैर्लङ्का वासरस्याशु गच्छतः।
क्षणमंशुकसंसक्ता हस्तालम्बमिवाकरोत्।।

**३. संधानकाव्यप्रवृत्तिः** – कथाद्वयस्य निरूपणङ्कुर्वन्महाकाव्यं सन्धानकाव्यं कथ्यते। तद्वताप्रवृत्तिरपि कतिपयमहाकविषु दृश्यते। यथा भट्टभीमकृतं रावणार्जुनीयमहाकाव्यं, विद्यामाधवकृतं पार्वतीरुक्मिणीयं, धनञ्जयकृतं राघवपाण्डवीयमहाकाव्यं च प्रमुखानि सन्ति। क्रमशोऽत्रा कार्तवीर्यार्जुनस्य रावणस्य च कथा 27 सर्गेषु सहैव निरूपिता कविना। धनञ्जयेन रामायणस्य महाभारतस्य कथा श्लेषेनैव प्रस्तुता।

**४. ऐतिहासिकमहाकाव्यप्रवृत्तिः** – प्रवृत्तिरियं तात्कालिकऐतिहासिक– वंशवृक्षादि– परिज्ञानाय आगामिसन्ततिभ्यः प्रकाशप्रदानाय स्मृतिपरम्पराणां पुनः पुनः संस्थापनाय च संस्कृतकविषु दृश्यते। ऐतिहासिकमहाकाव्यप्रवृत्तिषु विशालं प्रामाणिकं च काव्यं राजतरङ्गिणी मन्यते। क्षेमेन्द्रस्य नृपावली, हेलाराजस्य पार्थिवावली च परिज्ञायेते। परिमलकवेर्नवसाहसांकचरितम्, महाकविबिल्हणकृतं विक्रमाङ्कदेवचरितमित्यत्रा चालुक्यवंशीय– राज्ञां प्रामाणिकम् ऐतिह्यमूलं च वर्णनमुपस्थापितं वर्तते।[८] अस्यां प्रवृत्तौ तात्कालिकराजवंशादि– परम्पराणां साहित्यिकविवेचनं समुपलभ्यते। अतुलकविकृतं मूषकवंशमहाकाव्यं, अज्ञातकविकर्तृकं पृथ्वीराजविजयं, कवयित्रीगङ्गादेवीकृतं मधुराविजयं, श्रीकृष्णभट्टकृतम् ईश्वरविलासमहाकाव्यं, विंशशताब्दौ टी. गणपतिशास्त्रिकृतं भारतानुवर्णनम्, वेंकटरामराघवन्कृतं त्यागराजचरितमित्यादिकाव्यानां प्रवृत्तयोऽवलोक्यन्ते। एतन्महाकाव्यैः संस्कृतसाहित्यस्य वर्णनात्मकं शिल्पकला– ज्ञान– विज्ञान– संस्कृत्यादीनाञ्च महत्पल्लवनमवलोकयितुं शक्यते। इयमपि प्रवृत्तिः कालिदासोत्तरमहाकविषु तत आरभ्याद्यावधिपर्यन्तं सातत्येन प्रवहमाणा विलोक्यते।

**५. चरितप्रधानकाव्यात्मिकाप्रवृत्तिः** – एषाऽपि प्रवृत्तिः कालिदासोत्तरसंस्कृतसाहित्ये बाहुल्येन प्रवर्त्तमाना दृश्यते। अस्यां प्रवृत्तौ कस्यचिन्महापुरुषस्य चरित्रागुम्फनं भवति। भोज– शङ्कराचार्य– चैतन्यमहाप्रभ्वादिविभूतिष्वपि नैकविधमहाकाव्यानि दृष्टिपथमागतानि सन्ति। पूर्ववर्तिकाव्येषु भवभूतिकृते उत्तररामचरितं महावीरचरितञ्च स्तः। मध्यवर्तिसंस्कृतसाहित्ये कविव्यासाचलकृतं शङ्करदिग्विजयमहाकाव्यं चित्सुखाचार्यकृतं बृहच्छंकरविजयकाव्यं, अनन्तकविकृतं शङ्कराचार्यचरितमित्या– दिनिदर्शनानि सन्ति। परवर्तिसाहित्ये एतानि चरितकाव्यानि उपजीव्यत्वेन स्वीक्रियन्ते।[६] विंशशताब्दौ पं. क्षमारावकृतं तुकारामचरितं, रामदासचरितं, सन्तज्ञानेश्वरचरितमित्यादि। सर्वेष्वपि महाकाव्येषु राष्ट्रीयभावधारायाः राजनीतिकस्थितीनाञ्च विशिष्टं चित्राणमुपलभ्यते। अत्रापि चरितकाव्यात्मप्रवृत्तिभिः परस्परमुपजीव्योपजीवकभावपरतया संस्कृतसाहित्ये देशकालादि– कलाविज्ञानस्य नैरन्तर्यं प्रकर्षेण ज्ञायते।

**६. उपदेशपरकमहाकाव्यप्रवृत्तिः** – अत्रोपदेशमूलकमहाकाव्यैरपि संस्कृतसाहित्यपरम्परा युगयुगान्तरे संवर्द्धिता विभाति जैनबौद्धपरम्परायां नैकविधानि एतावन्ति महाकाव्यानि सन्ति। अश्वघोषकृतं बुद्धचरितम्। कलाविलासः, समयमातृका, चारुचर्या, सेव्यसेवकोपदेशः, नर्ममाला, नीतिकल्पतरुः इत्यादि महाकाव्यानि प्रमुखानि सन्ति।

न केवलमेतावत्यः प्रवृत्तयोऽपितु वेदकालादारभ्य विंशशतकं यावत् काव्य– महाकाव्य– नाट्यादिभिः विश्वस्तरीयसाहित्यप्रवृत्तीनां समृद्धं स्वरूपमवलोक्यते। साम्प्रतं गद्य– पद्य– गीति– नाट्य– गजल– प्रभृतानि कानिचित्काव्यानि विराजन्ते। नव्यकाव्यतत्त्वमीमांसायां द्विवेदिरहसविहारिणा कतिपयनवीनाः प्रवृत्तयः सङ्केतिताः यासामुपरि आधुनिकानां विदुषां लेखनी प्रवृत्ता अस्ति। ताश्च यथा– रागकाव्य– विमानकाव्य– दूतकाव्य– लहरीकाव्य– उपन्यास– लघुकथा– प्रगतिशीलकाव्य– बिम्बविधान– स्तोत्राकाव्य– नभोनाट्य– ताङ्काव्य– सीजोकाव्य– लिपिरूपककाव्यादयः रागकाव्येषु "कस्मै देवाय हविषा विधेम"– "तन्मे मनः शिवसङ्कल्पमस्तु" इति मंत्राद्वयवत् ध्रुवकप्रयोगप्रवृत्तिर्दृश्यते। साम्प्रतिकगीतकारेषु अभिराजराजेन्द्रमिश्र– राधावल्लभत्रिपाठि– इच्छारामद्विवेदि– भास्कराचार्य– कवितासु ध्रुवकप्रयोगाः दृश्यन्ते।

प्रतीकप्रयोगप्रवृत्तिविषये आधुनिकैः संस्कृतकविभिः प्रतीकानां प्रयोगः क्रियते। यथा जनतालहर्यां द्रौपद्याः चीरहरणं शीलहरणेऽपमाने वा प्रतीकीकुर्वताऽचार्येण राधावल्लभेन जनतायाः वर्तमाना स्थितिर्वर्णिता–

पाञ्चाल्या इव कृष्यते हतधिया दुःशासनेनानिशं,
यस्या वस्त्रामपीह चौव वदनाद् ग्रासस्तथा छिद्यते।
आमूलं छलिताऽशुभैनृपशुभिः कौटिल्यनीत्या च या,
सैवेयं जनता हता विदलिता कष्टां दशां प्रापिता।। (सागरिका 39/2 पृ.148)

एवंरीत्या काव्यशास्त्रीयग्रन्थानां पुनर्लेखनप्रवृत्तिपरम्परा परिवर्द्धमाना विद्यते। विंशशतकस्योद्धरार्द्धे आचार्यरेवाप्रसादद्विवेदिनः काव्यालङ्कार– कारिका। अत्र कारिकाकारस्य काचिन्नवीना अवधारणा प्रतिफलति यथा– ७(1) अर्थस्य काव्यत्वम् (2) अलङ्कारस्य काव्यात्मत्वम्। आचार्यब्रह्मानन्दशर्मणः काव्यसत्यालोकः, शिवज्युपाध्यायवर्यस्य साहित्य सन्दर्भः प्रकाशितः। एकविंशशतकारम्भे– आचार्यराधाबल्लभत्रिपाठिनः– अभिनवकाव्यालङ्कारसूत्राम्। अत्र आचार्यप्रवरैः संस्कृतसाहित्यालोके किमपि सर्वथा नवीनं काव्यलक्षणं व्यधायि। तद्धि– लोकानुकीर्तनं काव्यम्। अस्य काव्यलक्षणस्य लोकसङ्गतिः शास्त्रासङ्गतिश्च नितरां समीचीना काठिन्यात् सरलं प्रत्यभिमुखीना विभाति लेखकस्य प्रवृत्तिः, अपराप्येका सद्यःप्रकाशिता कृतिरित्येतेषां साहित्यवृक्षकारिका अत्र साहित्यं नाम वटवृक्षः। साहित्यवटवृक्षे पुष्पायमाणं मुक्तिरूपं परमप्रयोजनं निरूपयत्यत्रा ग्रन्थकारः। ग्रन्थकर्तुः सर्वथा नवेयं सरणिः रूपकेणेह वर्णिता। अभिराजराजेन्द्रमिश्रस्य अभिराजयशोभूषणं, अमरनाथपाण्डेयस्य काव्यसिद्धान्तकारिका इत्यादिग्रन्थाः संस्कृतसाहित्यस्य समृद्धतमां नवायमानां भावनां प्रकटयन्तो विभासन्तो।

संदर्भ ग्रन्थ सूची
(पादटिप्पण्यः)

1. भर्तृहरिप्रणीतं नीतिशतकम्, श्लोक क्र. 32।
2. साहित्यदर्पणः प्रथमपरिच्छेदः।
3. संस्कृत साहित्य परिचय, प्रो. आर. व्ही. त्रिपाठी।
4. अभिनव संस्कृत साहित्येतिहास 141,01/2.
5. अभिनव संस्कृत साहित्येतिहास, पृ. 253,61,0..
6. सागरिका (त्रैमासिकी शोधपत्रिका 39/2) प', 1481/2 REDMi~ Note 13 Pro 5G-

*****